# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर्-दिसम्बर्-२०१६

| | | |
|---|---|---|
| **कक्षा- शास्त्री-१ (SEM-1)** | **प्रश्नपत्र-८** | **गुणाः - ७०** |
| **विषयः- साहित्यम्** | **CE-112** | **समयः - ०३ तः ०६** |
| **दिनाङ्कः - १४/१२/२०१६** | **सन्दर्भग्रन्थः - रघुवंशम् ( सर्गः-२ )** | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ द्वयोः सन्दर्भपूर्वकं व्याख्यां कुर्वन्तु ।** **०८**

१. अथप्रजानामधिपः प्रभाते जायाप्रतिग्राहितगन्धमाल्याम् ।
वनाय पीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच ॥

२. तस्याः खुरन्यासपवित्रपांसुमपांसुलानां धुरि कीर्तनीया ।
मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत् ॥

३. स कीचकैर्मारुतपूर्णरन्ध्रैः कूजद्भिः आपादितवंशकृत्यम् ।
शुश्राव कुञ्जेषु यशः स्वमुच्चैरुद्गीयमानं वनदेवताभिः ॥

**प्र-२ महाकविकालिदासस्य जीवनपरिचयः देयः ।** **०८**

**अथवा**

**रघुवंशस्य महाकाव्यत्वेन मूल्याङ्कनं कुरुत ।**

**प्र-३ द्वयोः टिप्पणीं लिखत ।** **०४**

१. दिलीपस्य गौसेवा ।
२. दिलीपस्य वने स्वागतम् ।
३. कालिदासस्य कृतयः ।
४. रघुवंशस्य विशेषताः ।

**प्र-४ पञ्चप्रश्नानां अतिलघूत्तराणि लिखत ।** **०५**

१. रघुवंशे कति सर्गाः सन्ति?
२. रघुवंशं केन रचितम्?
३. दिलीपस्य पत्नी का?
४. कालिदासस्य कः अलङ्कारः प्रसिद्धः?
५. वसिष्ठस्य धर्मपत्नी का?
६. दिलीपः कां धेनुं सिषेवे?
७. सुदक्षिणादिलीपयोर्मध्ये धेनुः कीदृशी विरराज?

**॥ द्वितीयान्वितिः ॥**

**प्र-५ द्वयोः व्याख्यां कुर्वन्तु ।** **०८**

१. अलं महीपाल! तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात् ।
न पादपोन्मूलनशक्तिरंहः शिलोच्चये मूर्च्छति मारुतस्य ॥

२. अन्येद्युरात्मानुचरस्यभावं जिज्ञासमाना मुनिहोमधेनुः ।
गङ्गाप्रपातान्तविरूढशष्पं गौरीगुरोर्गह्वरमाविवेश ॥

३. गुरोः सदारस्य निपीड्य पादौ समाप्य सान्ध्यं च विधिं दिलीपः ।
दोहावसाने पुनरेव दोग्ध्रीं भेजे भुजोच्छिन्नरिपुर्निषण्णाम् ॥

**प्र-६ ग्रन्थानुसारं दिलीपस्य चरित्रचित्रणं कुरुत ।** **०८**

**अथवा**

**रघुवंशस्य द्वितीयसर्गस्य कथासारं लिखत ।**

**प्र-७ टिप्पणीं लिखन्तु । ( एका )** **०२**

१. प्रसादचिह्नानि पुरः फलानि ।

२. सिंहवर्णनम् ।

**प्र-८ निम्नेषु द्वयोः लघूत्तरं लिखत ।** **०२**

१. सिंहस्य नाम किमासीत्?

२. रघुवंशस्य द्वितीयसर्गे कति श्लोकाः सन्ति?

३. कस्मिन् दिवसे सिंहः नन्दिन्यामाक्रमणं कृतवान्?

४. व्रते कति दिनानि व्यतीतानि?

**॥ तृतीयान्वितिः ॥**

**प्र-९ द्वयोः ससन्दर्भं व्याख्यां कुर्वन्तु ।** **०८**

१. स त्वं मदीयेन शरीरवृत्तिं देहेन निर्वर्तयितुं प्रसीद ।
दिनावसानोत्सुकबालवत्सा विसृज्यतां धेनुरियं महर्षेः ॥

२. मान्यः स मे स्थावरजङ्गमानां सर्गस्थितिप्रत्यहारहेतुः ।
गुरोरपीदं धनमाहिताग्नेः नश्यत्पुरस्तादनुपेक्षणीयम् ॥

३. क्षतात्किल त्रायत इत्युदग्र क्षत्रस्य शब्दोभुवनेषु रूढः ।
राज्येन किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा ॥

**प्र-१० ग्रन्थानुसारं सिंहदिलीपयोः संवादं वर्णयन्तु ।** **०८**

**अथवा**

**नन्दिनीकृतां दिलीपपरीक्षां वर्णयन्तु ।**

**प्र-११ टिप्पणीद्वयं लिखत ।** **०४**

१. दिलीपस्य वरयाचना ।

२. दिलीपः ।

३. नन्दिनी ।

४. दिलीपस्य सन्ध्याकालीनगोसेवाप्रकारः ।

**प्र-१२ पञ्चानांतिलघूत्तरं लिखत ।** **०५**

१. नन्दिनी कस्याः अपत्यम्?

२. पुत्रकामनया दिलीपसुदक्षिणे कुत्र जग्मतुः ।

३. शिवेन सिंहः कुत्र नियुक्तः?

४. अरुन्धती का?

५. द्वितीयसर्गस्य नाम किम्?

६. सिंहस्य मित्रस्य नाम किम्?

७. दिलीपस्य राजधानी का?